This Question Paper consists of 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवं 4 मुद्रित पृष्ठाः सन्ति।

**Code No. 59/S/O**
गूढसंख्या

Roll No.
अनुक्रमाङ्कः

**Set /** स्तवकः **A**

# SANSKRIT SAHITYA
# संस्कृतसाहित्यम्
# (248)

Day and Date of Examination ..........................................................
(परीक्षादिवसः दिनाङ्कश्च)

Signature of Invigilators 1. ..........................................................
(निरीक्षकयोः हस्ताक्षरम्)

2. ..........................................................

---

***सामान्या निर्देशाः —***

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
3. वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

# SANSKRIT SAHITYA
## संस्कृतसाहित्यम्
## (248)

परीक्षासमयावधिः (Time) : होरात्रयम् (3 hrs) ] [ पूर्णाङ्काः (Full Marks) : 100

**निर्देशाः** — (i) अस्मिन् प्रश्नपत्रे [A] भागे 10, [B] भागे 10, [C] भागे 10, [D] भागे 5 इति आहत्य 35 प्रश्नाः सन्ति।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति।

(iii) **सर्वे** प्रश्नाः अनिवार्याः।

**[A]** दशानां प्रश्नानां युक्तं विकल्पं चिनुत— 1×10=10

1. किं पुरुषं सर्वदा भूषयति?

(क) केयूरः (ख) हारः

(ग) वाक् (घ) चन्दनादि

2. कलौ पद्मावतीनगर्याः किं नाम आसीत्?

(क) हिरण्यवतीः (ख) भोगवती

(ग) सुवर्णवती (घ) उज्जयिनी

3. ''प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता''—कस्य मतम्?

(क) भट्टतौतः (ख) भामहः

(ग) वामनः (घ) अभिनवगुप्तः

4. वीररसस्य स्थायिभावः कः?

(क) क्रोधः (ख) उत्साहः

(ग) विस्मयः (घ) हासः

5. छन्दः कतिविधम्?

(क) त्रिविधम् (ख) चतुर्विधम्

(ग) पञ्चविधम् (घ) सप्तविधम्

6. मम्मटाचार्यमते काव्यरचनायां कति हेतवः भवन्ति?

(क) द्वौ (ख) त्रयः

(ग) चत्वारः (घ) पञ्च

7. विन्ध्यमेरुविभूषिता इति विशेषणं कस्याः?

(क) पम्पानद्याः (ख) सीतायाः

(ग) पृथिव्याः (घ) लङ्कायाः

8. रामायणस्य कस्मिन् काण्डे रामहनुमतोः आदिमः संवादः प्राप्यते?

(क) किष्किन्धाकाण्डे (ख) अरण्यकाण्डे

(ग) सुन्दरकाण्डे (घ) युद्धकाण्डे

9. कर्णभारनाटकस्य मङ्गलश्लोके सूत्रधारः कं नमस्करोति?

(क) नृसिंहम् (ख) महेश्वरम्

(ग) ब्रह्माणम् (घ) गजाननम्

10. नयेन जगतीं जेतुं कः इच्छति?

(क) युधिष्ठिरः (ख) अर्जुनः

(ग) दुर्योधनः (घ) कर्णः

**[B]** दशानां यथानिर्देशम् उत्तराणि लिखत— 2×10=20

11. कीदृशस्य जनस्य कृते किमपि औषधं नास्ति? विषस्य निवारकं शास्त्रविहितम् औषधं किम्? 1+1

12. कः जन्तुः चन्द्रमण्डलं चुम्बति? कथम्? 1+1

13. मनुष्यस्य चरित्रं के जानन्ति? 2

14. 'कोऽनङ्गरतिपतिः' इति शीर्षिकायां वेतालपञ्चविंशतिकथायां द्वितीयस्य विज्ञानिनः नाम किम्? तस्य किं वैशिष्ट्यम्? 1+1

15. विश्वनाथमते रीतीनां कति भेदाः? के च ते? 1+1

16. हनुमान् कथं भिक्षुकवेषं स्वीकृतवान्? 2

17. कर्णः कस्मै कवचकुण्डले दत्तवान्? स कीदृशं वेषं परिधाय कर्णसमीपं समागच्छत्? 1+1

18. कर्णस्य गुरुः कः? तस्य हस्ते किम् आसीत्? 1+1

19. ''न विव्यथे तस्य मनः''—कस्य मनः किमर्थं न विव्यथे? 1+1

20. कः किंसखा? को वा किम्प्रभुः? 1+1

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त— 4×10=40

21. मनुष्यस्य महान् रिपुः कः? को वा प्रकृतो बन्धुरिति सश्लोकं प्रतिपादयत।

22. दुर्जनेन समं सख्यं वैरञ्चापि न कारयेत्।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम्॥
इति श्लोकं व्याख्यात।

23. वृक्षाग्रे च फलं दृष्टं फलाग्रे एव च।
अकारादिसकासान्तं यो जानाति स पण्डितः॥
इति श्लोकं व्याख्यात।

24. महिलासक्ताः पुरुषाः किं कुर्वन्ति इति शुकसप्ततिकथाधारेण लिखत।

25. कवेः स्वरूपं लिखत।

26. अविस्तरमसन्दिग्धमविलम्बितमव्यथम्।
उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमस्वरम्॥
इति श्लोकं व्याख्यात।

27. ''एवंविधो यस्य दूतो न भवेत् पार्थिवस्य तु''—कमुद्दिश्य कस्य वचनम्? वक्ता किमर्थमेतदुक्तवान्?

28. ''सूर्य इव, चन्द्र इव, हिमवान् इव सागर इव तिष्ठतु ते यशः'' इति आशीर्वादं कः कस्मै किमर्थं दत्तवान्? एतादृशाशीर्वाददानस्य समर्थकं वाक्यं लिखत।

29. ''अनुस्मृताखण्डलसूनुविक्रमः'' इति पदस्य अर्थद्वयं विलिख्य दुर्योधनस्य युधिष्ठिराद् भीतिं वर्णयत।

30. श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः॥
इति श्लोकं व्याख्यात।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः — 6×5=30

31. ''यतो धर्मस्ततो जयः'' इति कथायाः सारं लिखत।

32. काव्यस्य लक्षणानि आलोचयत।

33. ''कथं देशमिहागतौ'' इति प्रश्नकरणच्छलेन हनुमान् रामलक्ष्मणयोः प्रशंसां कथं कृतवान् इति यथाग्रन्थं लिखत।

34. कर्णभारनाटकाधारेण कर्णस्य अस्त्रवृत्तान्तं वर्णयत।

35. वनेचरवचनानि परिशील्य तस्य कतिपयगुणान् प्रकाशयत।

★ ★ ★